# Sadguru Shri Tyagabrahma Sharanagati Stotram

# સદ્ગુરુશ્રીત્યાગબ્રહ્મશરણાગતિસ્તોત્રમ્

## Document Information

Text title : Sadguru Shri Tyagabrahma Sharanagati Stotram

File name : sadgurushrItyAgabrahmasharaNAgatistotram.itx

Category : deities_misc, puShpAshrIvatsan, gurudeva, stotra

Location : doc_deities_misc

Author : Pushpa Shrivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : Sadguru Sri Tyagabrahma Pushpanjali 2015

Latest update : October 19, 2023

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

October 19, 2023

*sanskritdocuments.org*

# સદ્ગુરુશ્રીત્યાગબ્રહ્મશરણાગતિસ્તોત્રમ્

ૐ

। શ્રીરામજયમ્ ।

। ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

અથ શરણાગતિસ્તોત્રમ્ ।

સ્વરરાગસુધારસપુણ્યતનો નરતલ્લજસત્કૃતિકારગુરો ।
કવિશક્તિસરક્તિસુયુક્તકૃતે ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૧॥

સ્વરદૈવતનર્તનદિવ્યદૃશ સરિગામપધાનિઝરાસરગ ।
સકલાર્થસુનામસુકઞ્જસર ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૨॥

ઋષભપ્રિયમોદનનામનિધે ઋષિપુઙ્ગવ મત્પ્રિયસત્ત્વગુરો ।
રિપુસૂદનસૂદનનાદનિધે ગુરુપુઙ્ગવ સચ્ચરણં શરણમ્ ॥ ૩॥

ગગનાગમદેવ સુગાનપતે ગગનાગમપુણ્યસરિત્સુકૃતે ।
ગિરિરાજસુતાપ્રવહાનદગ ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૪॥

મમકારનકારનકારગુરો મમ સુશ્રુતિસદ્ગતિશિક્ષગુરો ।
મમ દોષનિવારણરક્ષગુરો મમ દેવ ભવચ્ચરણં શરણમ્ ॥ ૫॥

મમ માનસરાજતપુણ્યહિમ મમ વાક્પ્રવહાનદગઙ્ગસર ।
મમ માનસલીનસુનાદગુરો મમ સર્વ ભવચ્ચરણં શરણમ્ ॥ ૬॥

પરપઞ્ચનદોદ્ભવનાદનદ પરરામપરાઙ્ગવસઙ્ગમગ ।
પરસુસ્વરપૂજિતરામહરે ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૭॥

ધનદાશરથીનુતિગાનસુધે ધરણીતનયાપતિરાગનિધે ।
ધરણીતલસઞ્ચરનાદપતે ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૮॥

નિષદાપનયાનદરાગસરે નિરુપાયમદોદ્ધરણં તવ ખમ્ ।
નિગમાગમશાસ્ત્રસુકીર્તનધે ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૯॥

સગુણાર્ચિતનિર્ગુણરૂપવિદ સ્વરસાગરપારગનાદરુચે ।
હરિભક્તિયુતાદ્ભુતશક્તિદધ ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૧૦॥

હરિદાશરથીરતગાશરધે હરિદાસસુદાસસુભાવયુત ।
હરિહારણસત્તમકૃત્યયુત ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૧૧॥

હરિરામસુગાનસુનાદરસ હરિકૃષ્ણસુનામસુધાપ્લવન ।
હરિકેશવમાધવગાનઘન ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૧૨॥

સુરવન્દનસિઞ્ચનભક્તિરસ સુરરામસુનામસુગાનરસ ।
વરરાગલયજ્ઞસુભાષરસ ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૧૩॥

પદશિઞ્જનઝઙ્કૃતિનાદયુત કરતાલલયાલયલાસ્યગુરો ।
ગલલીનસુતુમ્બરનાદરત ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૧૪॥

ભગવદ્ગુણગાનસમાધિલય ભગદાયકગાયકભક્તિનિધે ।
નિધિતુચ્છમતપ્રિયરામનિધે ગુરુરાય ભવચ્ચરણં શરણમ્ ॥ ૧૫॥

રઘુરામસરામવિરામમતે અવિરામરમારમરામમતે ।
અભિરામસુનામસુમન્ત્રજપ ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૧૬॥

નરરૂપસુદર્શિતરામઘૃણે વરગાનસુવર્ષણનાદગિરે ।
પરદર્શનહર્ષયુતપ્રબુધ ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૧૭॥

ભવતારણતારકમન્ત્રગુરો ભવભાવનભાવનગાનનિધે ।
ભવવૈદ્યનિવેદ્યસુદિવ્યકૃતે ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૧૮॥

સ્વરરાગલયાર્ચિતમારમણ વરરાગસુધારસપાનરત ।
પરરામસુનામસુગાનસુખ ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૧૯॥

રઘુપુઙ્ગવકીર્તનતુઙ્ગગિરે રઘુનાથસુનાદસુવર્ગનદ ।
રઘુરાજસુકીર્તનરાજવર ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૨૦॥

મમ જીવનજીવનજીવનદ વરસત્કૃતિવિપ્લવસાન્ત્વગુરો ।
વરરાગલયાલયકીર્તનદ ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૨૧॥

વરવાગ્વચનાર્થસુપુષ્ટિનૃતિસ્વરસૌષ્ટવભક્તિયુતપ્રવહ ।
રઘુનાયકગાયકદિવ્યનદ ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૨૨॥

વરવિષ્ણુસુપાદવહાનદવાક્સલસુસ્વરનામસુનન્દલકા ।
વરવેણિભગીરથયત્નફલાનદગઙ્ગસુગાસર મે શરણમ્ ॥ ૨૩॥

પરિપૂતસુવાગભિષિક્તહરે પરિમૂકસુવાગભિષિક્તગુરો ।
ગુરુભક્ત્યુપયુક્ત્યસહાયનુત ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૨૪॥

શરણાગતનાન્યગતિપ્રણય સ્વરરાગરહસ્યલયાહરણ ।
પરિમૂકસુનાદસુવાગ્વરદ ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૨૫॥

હૃદયઙ્ગમસત્કૃતિતત્ત્વસર હૃદયઙ્ગમસત્તમસત્ત્વગુરો ।
હૃદયે કમલે નિતરાં ભવિત ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૨૬॥

હૃદયાલયવિગ્રહરામનુતે હૃદયાલયવિગ્રહરૂપનુત ।
હૃદયાચલધાઙ્ષણગાનનદ ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૨૭॥

હૃદયાલયવાસસદાનિરત હૃદયાલયવાસનપુષ્પરસ ।
હૃદયાલયસાર્ચનપુષ્પપદ ગુરુદેવ ભવચ્ચરણં શરણમ્ ॥ ૨૮॥

ભગભવ્યસુમઙ્ગલનિત્યવર ભવતારકનામસુગાનવર ।
ચિરજીવનિરામયદિવ્યદૃશ ગુરુમઙ્ગલસચ્ચરણં શરણમ્ ॥ ૨૯॥

ગુરુમઙ્ગલસુપ્રદભવ્યવર શુભમઙ્ગલસત્પ્રદપૂજ્યપદ ।
ચિરમઙ્ગલકારકગાનગુરો તવ મઙ્ગલસચ્ચરણં શરણમ્ ॥ ૩૦॥

ૐ

શુભમસ્તુ ।

Encoded and proofread by N V Vathsan nvvathsan at gmail.com

Copyright Pushpa Srivatsan

*Sadguru Shri Tyagabrahma Sharanagati Stotram*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way

without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on October 19, 2023

Please send corrections to *sanskrit@cheerful.com*